# श्री शनैश्चरस्तोत्रम्

अस्य श्री शनैश्चरस्तोत्रस्य दशरथ ऋषिः|शनैश्चरो देवता| त्रिष्टुप् छन्दः|शनैश्चरप्रीत्यर्थ जपे विनियोगः| दशरथ उवाच |

कोणोऽण्तको रौद्रयमोऽथ बभ्रुः कृष्णः शनिः पिंगलमन्दोसौरिः |
नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय || १
सुरासुराः किंपुरुषोरगेन्द्रा गन्धर्वविद्याधरपन्नगाश्च |
पीड्यन्ति सर्वे विषमश्थितेन तस्मैइ नमः श्रीरविनन्दनाय || २
नरा नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृङ्गाः |
पीड्यन्ति सर्वे विषमश्थितेन तस्मैइ नमः श्रीरविनन्दनाय || ३
देशाश्च दुर्गाणि वनाणि यत्र सेनानिवेशाः पुरपत्तनानि |
पीड्यन्ति सर्वे विषमश्थितेन तस्मैइ नमः श्रीरविनन्दनाय || ४
तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बरदानतो वा |
प्रीणाति मन्त्रैर्निजवसरे च तस्मै नमः श्रीरविनन्दनाय || ५
प्रयागकूले यमुनातटे च सरस्वतीपुण्यजले गुहायाम् |
यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्रीरविनन्दनाय || ६
अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यत् |
गृहाद् गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनन्दनाय || ७
स्रष्टा स्वयंभूर्भुवनत्रयस्य त्राता हरीशो हरते पिनाकी |
एकस्त्रिधाअ ऋग्ययजुःसाममूर्तिस्तस्मै नमः श्रीरविनन्दनाय || ८
शन्यष्टकं यः प्रयतः प्रभते नित्यं सुपुत्रैः पशुबान्धवैश्च |
पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदन्ते || ९
कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः |
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः || १०
एतानि दश नामाअनि प्रातरुत्थाय यः पठेत् |
शनैश्चरकृता पीडा न कदाचिद्भविष्यति || ११

## इति श्रीब्रह्माण्डपुराणे श्रीशनैश्चरस्तोत्रं संपूर्णम्